# Shakti Stavah

# શક્તિસ્તવઃ

## Document Information

Text title : shaktistavaH

File name : shaktistavaH.itx

Category : devii, devI, dashamahAvidyA, pArvatI

Location : doc_devii

Proofread by : Manusiri Janakiraman

Description/comments : Gandharva Tantra aShTatriMshaH paTalaH 38 shlokAH 10-45

Latest update : June 21, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2021

*sanskritdocuments.org*

# શક્તિસ્તવઃ

બ્રહ્મા ઉવાચ-
ત્વં સાવિત્રિ ચ વાગ્દેવી ત્વં શ્રીઃ સર્વજગત્પ્રસૂઃ ।
સ્વાહા ત્વં દેવયજ્ઞેષુ પિતૃયજ્ઞેષુ ચ સ્વધા ॥ ૧॥

સ્વધા ત્વં દેવલોકેષુ હવિસ્ત્વં ખલુ માનુષે ।
ત્વં હિ વિદ્યાશ્ચ મન્ત્રાશ્ચ વેદાસ્ત્વં હિ સુરાત્મિકા ॥ ૨॥

અર્દ્ધમાત્રાત્મિકા ત્વં વૈ યાનુચ્ચાર્યા વિશેષતઃ ।
ત્વમેવ પરમા શક્તિર્જગત્કારણરૂપિણી ॥ ૩॥

વિચાર્યાઽષ્ટાઙ્ગયોગેન લક્ષણાદ્યૈર્મુહુર્મુહુઃ ।
યત્ સ્થિરીક્રિયતે દેવિ ! તત્ તે રૂપં સનાતનમ્ ॥ ૪॥

યદવ્યક્તમનિર્દેશ્યં નિષ્કલં પરમાત્મનઃ । (નિષ્ફલમ્)
રૂપં તવૈવ તત્ સૂક્ષ્મં સકલં ચ જગન્મયિ! ॥ ૫॥

યા સૃષ્ટિશક્તિરસ્માકં સ્થિતિશક્તિસ્તથા હરેઃ ।
અન્તશક્તિસ્તથેશસ્ય સા ત્વં શક્તિઃ સનાતની ॥ ૬॥

ત્વં જાતવેદોગતા શક્તિરુગ્રા
 ત્વં દાહિકા સૂર્યકરસ્ય શક્તિઃ ।
આહ્લાદિકા ત્વં બહુ ચન્દ્રિકાયા-
 સ્તાં ત્વામહં નૌમિ નમામિ ચામ્બિકામ્ ॥ ૭॥

યોષા યોષિત્પ્રિયાણાં ત્વં વિદ્યા ત્વં ચોર્ધ્વરેતસામ્ ।
વાઞ્છા ત્વં સર્વજગતાં માયા ચ ત્વં તથા હરેઃ ॥ ૮॥

યયા પ્રકાશ્યતે બ્રહ્મ સા ત્વં નિત્યા પ્રસીદ મે ।
વિશ્વાદિસ્ત્વમનાદિસ્ત્વં વિશ્વયોનિરયોનિજા ॥ ૯॥

અનન્તાત્ સર્વજગતસ્ત્વમેવૈકાન્તરૂપિણી ।

એકા ત્વં ત્રિવિધા ભૂત્વા મોક્ષસંહારકારિણી ॥ ૧૦॥

સંસારસાગરોત્તારતરણિઃ સુખમોક્ષદે ।
ત્વં નિત્યા ત્વમનિત્યા ચ ત્વં ચરાચરમોહિની ॥ ૧૧॥

નમસ્તે જગતાં માતઃ ! સૃષ્ટિરૂપે સનાતનિ ।
સ્થિતિરૂપે નમસ્તુભ્યં નમઃ સંહારરૂપિણિ ॥ ૧૨॥

એવં સંસ્તૂયમાના સા યોગનિદ્રા વિરિઞ્ચિના ।
આવિર્બભૂવ પ્રત્યક્ષં બ્રહ્મણઃ પરમાત્મનઃ ॥ ૧૩॥

દેવી ઉવાચ-
પરિતુષ્ટાસ્મિ લોકેશ સ્તોત્રેણાનેન તે વિભો ! ।
વરં વૃણીષ્વ ભદ્રં મે યત્ તે મનસિ વર્તતે ॥ ૧૪॥

ઈશ્વર ઉવાચ-
માં સમીક્ષ્ય વરં વવ્રે જગત્સંહારકારકમ્ ।
સૃષ્ટિશક્તિં મયિ ત્વં ચ વિષ્ણૌ પાલનરૂપિણીમ્ ॥ ૧૫॥

સંહારશક્તિમીશાને દેહિ માતર્નમોઽસ્તુ તે ।
એકશ્ચરતિ ભૂતેશો ન દ્વિતીયાં સમીહતે ।
તથા મોહય સર્વેશં દારાઃ સ્વયં જિઘૃક્ષતિ ॥ ૧૬॥

દેવી ઉવાચ-
યદુક્તં ભવતા બ્રહ્મન્ ! તચ્ચ સત્યં ન ચાન્યથા ।
મોહયિત્વાઽહમીશાનં સતીરૂપેણ શઙ્કરમ્ ॥ ૧૭॥

સંહરિષ્યામિ લોકેશ! જગદેતચ્ચરાચરમ્ ।
તત્રાપિ તાં તનું ત્યક્ત્વા સમ્ભવિષ્યામિ પાર્વતી ॥ ૧૮॥

ઇતિ તસ્મૈ સમાભાષ્ય બ્રહ્મણે પરમેશ્વરી ।
વીક્ષ્યમાણા જગત્સ્રષ્ટ્રા તત્રૈવાન્તરધીયત ॥ ૧૯॥

તસ્યામન્તર્હિતાયાં ચ બ્રહ્મા લોકપિતામહઃ ।
કૃતાઞ્જલિપુટો ભૂત્વા વિષ્ણુમાહ પ્રજાપતિઃ ॥ ૨૦॥

સંહારકરણે યોગ્યં વીરભાવં ચ યદ્ ભવેત્ ।
તન્નિદેશે મહાદેવે વિષ્ણો લોકેષુ દુર્લભમ્ ॥ ૨૧॥

ઇતિ તદ્ વચનં શ્રુત્વા ભગવાન્ હરિરીશ્વરઃ ।

આદિષ્ટવાન્ મયિ ભદ્રે વીરભાવં સુદુર્લભમ્ ॥ ૨૨॥

વીરભાવે સ્થિતઃ સોઽહં માતસ્ત્વાં સમુપાસ્મહે ।
અદ્યાપિ પરમેશાનિ ! માતસ્તુભ્યં નમો નમઃ ॥ ૨૩॥

પ્રકૃતિઃ સર્વભૂતાનાં ત્વં હિ સર્વજગત્પ્રસૂઃ ।
યા મુક્તિર્મમ દેવેશિ ! ક્ષિતિરૂપા તુ જીયતે ।
સ ત્વમેવ ન મે નાહં માતઃ ! સત્યં નમો નમઃ ॥ ૨૪॥

યા મે મૂર્તિર્દ્વિતીયા ચ જલમયીતિ કથ્યતે ।
સા ત્વમેવ ન મે નાહં માતઃ! સત્યં નમા નમઃ ॥ ૨૫॥

આગ્નેયી યા તૃતીયા મે જગત્ક્ષોભણકારિણી ।
સા ત્વમેવ ન મે નાહં માતઃ! સત્યં નમો નમઃ ॥ ૨૬॥

ચતુર્થી વાયવી મૂર્તિઃ સૃષ્ટિસંહારકારિણી ।
સા ત્વમેવ ન મે નાહં માતઃ ! સત્યં નમો નમઃ ॥ ૨૭॥

પઞ્ચમી યા ચ સર્વેષાં પરિણામસ્વરૂપિણી ।
સા ત્વમેવ ન મે નાહં માતઃ ! સત્યં નમો નમઃ ॥ ૨૮॥

ષષ્ઠી યા સર્વદેવાનામાપ્યાયનીતિ ગીયતે ।
સા ત્વમેવ ન મે નાહં માતઃ ! સત્યં નમો નમઃ ॥ ૨૯॥

સપ્તમી મમ મૂર્તિર્યા જગદાહ્લાદકારિણી ।
સા ત્વમેવ ન મે નાહં માતઃ ! સત્યં નમો નમઃ ॥ ૩૦॥

અષ્ટમી મમ મૂર્તિર્યા સ્થિતિસંહારકારિણી ।
સા ત્વમેવ ન મે નાહં માતઃ ! સત્યં નમો નમઃ ॥ ૩૧॥

તવૈવાહં ન મે કિઞ્ચિદ્ યદિહ જગતીતલે ।
ત્વયૈવેદં જગદ્વ્યાપ્તં જગત્ સર્વં ત્વમેવ હિ ॥ ૩૨॥

દેવી ઉવાચ-
મયા સર્વં જગદ્ વ્યાપ્તં વત્સ ! સત્યં પ્રભાષસે ।
મમૈવૈતેઽવતારાશ્ચ મત્સ્ય કૂર્માદયોઽપરે ॥ ૩૩॥

ત્વમેવાહં ન ચાન્યોઽસ્તિ બ્રહ્માહં વિષ્ણુરપ્યહમ્ ।
અહમેવ જગત્ સર્વં નાસ્તિ કિઞ્ચિન્મયા વિના ॥ ૩૪॥

યત્તુ પશ્યસિ હે વત્સ ! યત્કિઞ્ચિજ્જગતીતલે ।

બ્રહ્માદિસ્તમ્બપર્યન્તમહમેવ ન સંશયઃ ॥ ૩૫॥

ઇહૈકસ્થો જગત્ કૃત્સ્નં પશ્યાદ્ય સચરાચરમ્ ।
ઇત્યુક્ત્વા દર્શયામાસ શમ્ભવે જગદીશ્વરી ॥ ૩૬॥

સ્વશરીરે જગત્ કૃત્સ્નં સમ્પ્રવિષ્ટમનેકધા ।
જગન્મયીં તતો દૃષ્ટ્વા શમ્ભુર્માયાવિમોહિતઃ ॥

મામુદ્ધર જગન્માતર્મોહસાગરમધ્યતઃ ॥ ૩૭॥

ઇતિ ગન્ધર્વતન્ત્રે અષ્ટાત્રિંશઃ પટલાન્તર્ગતઃ
બ્રહ્મપ્રોક્તઃ શક્તિસ્તવઃ સમાપ્તઃ ।

Gandharva Tantra PaTala 38 Verses 10-45

Proofread by Manusiri Janakiraman

*Shakti Stavah*

pdf was typeset on June 29, 2021

Please send corrections to *sanskrit@cheerful.com*